**संस्कृत-वार्ता:**

**दिनाङ्क : 02/02/2026** **सायम् - 06:20**

**आदौ मुख्यवार्ता:**

- संसदः उभयसदनयोः संयुक्तसम्मेलनाय राष्ट्रपतिना द्रोपदीमुर्मुवर्यया प्रदत्तं अभिभाषणम् अधिकृत्य लोकसभया धन्यवादज्ञापन-प्रस्तावे चर्चा कृता ।
- अमेरिका-भारत-रणनीतिक-सहयोग-मञ्चेन केन्द्रीय-आयव्ययकम् इत्येतत् प्रशंसितम् ।
- विज्ञान-विकास-तन्त्रज्ञानमन्त्री डा. जितेन्द्रसिंहवर्यः अवदत् यत् केन्द्रीय-आयव्ययकेन मध्यमर्गीयेभ्यः लाभ्यः प्रदास्यते ।
- सर्वोच्चन्यायालयेन पेन्नैयार्-नद्याः जलविभाजन-विषये तमिळुनाडु-कर्नाटकयोः मध्ये दीर्घकालं यावत् विलम्बितस्य विवादस्य न्यायनिर्णयं कर्तुम् न्यायाधिकरणम् निर्मातुं केन्द्रसर्वकाराय आदेशः दत्तः ।
- ईरानेन इस्लामिक-रिपब्लिक इत्यत्र प्रतिष्ठितस्य यूरोपियन-यूनियन इत्यस्य राजदूताः समाहूताः येन पैरामिलिट्री-रिवोल्यूशनरी-गार्ड इत्येत् आतङ्कवादि-सङ्घटनम् उद्घोषयितुं कृतस्य निर्णयस्य विरोधः क्रियात् ।
- एशियन्-राइफल-एण्ड-पिस्टल-शूटिंग-चैम्पियनशिप् इत्येषा क्रीडाप्रतियोगिता नवदिल्ल्यां समारब्धा ।

।।अथ वार्ताः विस्तरेण।।

**लोकसभा-धन्यवादज्ञापनम्**

संसदः उभयसदनयोः संयुक्तसम्मेलनाय राष्ट्रपतिना द्रोपदीमुर्मुवर्यया प्रदत्तं अभिभाषणम् अधिकृत्य लोकसभया धन्यवादज्ञापन-प्रस्तावे चर्चा कृता । चर्चायै आहत्य अष्टादश-होराः विनियोजिताः आसन् ।

प्रस्तावम् उपस्थापयन्, भाजपादलस्य मन्त्री सर्वानन्दसोनोवालः अवदत् यत्, मुर्मुवर्यायाः अभिभाषणं देशस्य भविष्यं प्रति दृष्टिकोणं प्रतिपादयति । सः अकथयत् अनेन अभिभाषणेन सामाजिकसुरक्षायै, निरन्तरवृद्ध्यै, विकसितभारताय च सर्वकारस्य प्रतिबद्धता प्रकाश्यते ।

**केन्द्रीय-आयव्ययिकम्**

अमेरिका-भारत-रणनीतिक-सहयोग-मञ्चेन केन्द्रीय-आयव्ययकम् इत्येतत् प्रशंसितं, भारतस्य सुदृढ-प्रतिस्पर्धात्मकतायाः, निवेश-वर्धनस्य, व्यापारसुगमतायाः च प्रगतिशील-मार्गचित्रम् एतत् वर्णितम् । वित्तमन्त्री निर्मला-सीतारमणवर्या अद्य संसदि आगामि वित्त-वर्षस्य केन्द्रीय-आयव्ययकम् उपस्थापितवती येन विनिर्माणस्य, अवसंरचनायाः, आजीविकायाः च कृते प्रबलं प्रोत्साहनं प्रदत्तम् अपि च सरलतया करस्य सीमाशुल्कस्य च व्यवस्थायाः प्रस्तावः कृतः । स्टेट्-बेङ्क्-आफ्-इण्डिया इत्यस्य अध्यक्षः चल्ला-श्रीनिवासुलु-सेट्टी इत्येषः अकथयत् यत् केन्द्रीय-आयव्ययकं वैश्विक-प्रतिस्पर्धात्मकतया सह भारतं नवान्वेषणस्य उन्नत-विनिर्माणस्य च वैश्विक-केन्द्ररूपेण निर्मातुं महत्त्वपूर्णं सोपानम् अस्ति । दिल्ल्याः मुख्यमन्त्रिवर्या रेखा-गुप्ता इत्येषा अकथयत् यत्, केन्द्रीय-आयव्ययकं युवभ्य, महिलाभ्यः, मध्यमवर्गाय अवसरान् प्रददाति, तथा च देशस्य अर्थव्यवस्थां सुदृढीकर्तुं स्पष्टं मार्गचित्रं प्रस्तौति।

**जितेन्द्र-आयव्ययकम्**

केन्द्रीय-आयव्ययकं भविष्यवादी इति सम्बोधयन् , विज्ञान-विकास-तन्त्रज्ञानमन्त्री डा. जितेन्द्रसिंहवर्यः अद्य अवदत् यत्, एतत् आयव्ययकं शताब्दस्य अग्रिम-चतुर्थांशस्य मार्गचित्रं निर्दिशति । अद्य नवदिल्ल्यां पत्रकारसम्मेलनं सम्बोधयन् डा. सिंह-वर्यः अकथयत् यत् बायो-फार्मा-शक्तिः इत्यर्थं दश-सहस्रकोटि-रूप्यकाणां प्रबंधनेन जैवनिर्माणक्षेत्रे भारतस्य स्थानं सुदृढं भविष्यति ।

**सर्वोच्चन्यायालयः-जलविवादः**

सर्वोच्चन्यायालयेन पेन्नैयार्-नद्याः जलविभाजन-विषये तमिळुनाडु-कर्नाटकयोः मध्ये दीर्घकालं यावत् विलम्बितस्य विवादस्य न्यायनिर्णयं कर्तुम् न्यायाधिकरणम् निर्मातुं केन्द्रसर्वकाराय आदेशः दत्तः । सर्वोच्चन्यायालयेन केन्द्र-सर्वकाराय एकमासाभ्यन्तरं अधिसूचनां प्रकाशितुं, जलविवाद-न्यायाधिकरणस्य निर्माणं कर्तुं च आदेशः प्रदत्तः ।

**ईरानः-यूरोपः**

ईरानेन  इस्लामिक-रिपब्लिक इत्यत्र प्रतिष्ठितस्य यूरोपियन-यूनियन इत्यस्य राजदूताः समाहूताः येन पैरामिलिट्री-रिवोल्यूशनरी-गार्ड इत्येत् आतङ्कवादि-सङ्घटनम् उद्घोषयितुं कृतस्य निर्णयस्य विरोधः क्रियात् । ईरानस्य विदेश-मंत्रालयस्य प्रवक्ता इस्माइल-बगाई इत्यनेन पत्रकाराः कथिताः यत् आह्वानप्रक्रिया ह्यः समारब्धा या अद्यापि प्रचलिष्यति ।

**विराम**

संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते।  सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।

**राष्ट्रपति-ओडिशायात्राः**

राष्ट्रपतिः द्रौपदीमुर्मूवर्या अद्य दिवसात् आरभ्य ओडिशा, छत्तीसगढ इत्येतयोः राज्ययोः षड्दिवसानां यात्रायाम् अस्ति ।  अद्य सायङ्कालं सा पूर्वनिर्धारितस्य यात्राकार्यक्रमस्य अन्तर्गतं भुवनेश्वरं प्राप्स्यति। आगामिषु  केषुचित् दिनेषु राष्ट्रपतिवर्या ओडिशा-राज्ये धार्मिक-शैक्षणिक-विकासात्मकानि विविधानि कार्याणि सम्पादयिष्यति।

**रिजीजू-धन्यवादाः**

संसदीय-कार्यमन्त्री किरेनरिजीजूः उक्तवान् यत् लोकसभायां राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावस्य चर्चायै संसदः उभयसदनयोः संयुक्तसम्मेलनस्य कृते आहत्य अष्टादश-होराः विनियोजिताः सन्ति । संसदः बहिः वार्ताकारैः सह वार्तालापं कुर्वन् श्रीरिजिजुः अवदत् यत्, चर्चायाः विस्तारः दिनत्रयं यावत् भविष्यति, प्रधानमन्त्रिणा नरेन्द्रमोदिना बुधवासरे लोकसभायां चर्चायाः उत्तरं प्रदास्यते ।

**जगदंबिका-पाल-गान्धी**

भाजपादलस्य सांसदा जगदंबिकापालः इत्येषः अद्य लोकसभायां कोलाहलं कर्तुं लोकसभाध्यक्षस्य ओम्-बिर्ला-वर्यस्य निर्णयं नानुपालयितुं विपक्षनेतारं राहुलगान्धिनं विरुद्ध्य कार्याचरणं विधातुं अध्यर्थितवान् । आकाशवाणी-न्यूस् इत्यनेन सह वार्तालापं कुर्वन् श्रीपालः अवदत् यत् गान्धीवर्यः पूर्वसेनाप्रमुखस्य एम्.एम्.-नरवणे इत्यस्य पुस्तक-विषये उल्लेखं करोति , यत् अद्यापि न प्रकाशितम्। श्रीपालः इत्यपि अवदत् यत् रक्षामन्त्री राजनाथसिंहः, गृहमन्त्री अमितशाहः च अपि आक्षेपं कृतवन्तौ, यत् राहुल-महोदयः अप्रकाशितस्य पुस्तकस्य उल्लेखं न कुर्युः ।

**नव-मण्डाविया-क्विज्**

केन्द्रीय-युव-कार्य-क्रीडामन्त्री डा. मनसुखमाण्डवीयः विकसित-भारत-युवनेतृणां संवादस्य सफलतायाः अनन्तरं, अद्य माई. भारत्-बड्जट्-क्वेस्ट् 2026 इत्यस्य आरम्भं कृतवान् । श्वः आरभ्यमानस्य राष्ट्रव्यापि-युव-केन्द्रित-उपक्रमस्य उद्देश्यं, देशस्य युवजनैः केन्द्रीय-आयव्ययिकस्य अवबोधनं कारयितुं, आयव्ययिक-उपबन्धान् सुलभतरं, सम्बद्धं, नागरिक-केन्द्रितं च कर्तुं निर्धारितम् अस्ति । एषः उपक्रमः संरचित-सहभागितापूर्ण-संरचनायाः माध्यमेन, सम्पूर्णे देशे महाविद्यालयानां, संस्थानां, प्रशिक्षणकेन्द्राणां च युवान् योजयित्वा, नागरिकानां दैनन्दिन-जीवनेन सह आयव्ययिकं योजयितुं प्रयतते । डा. माण्डवीयः अवदत् यत् प्रतियोगितायाः प्रथम-प्रक्रमः अस्मिन् मासे सप्तदश-दिनाङ्क-पर्यन्तं माई भारत् पोर्टल् इत्यत्र पञ्जीकृतानां युवानां कृते उद्घाटितः भविष्यति ।

**भारत-एआई. शिखरसम्मेलनम्**

नवदिल्ल्यां अस्य मासस्य षोडष-दिनाङ्कात् आरभमाणेन भारत-ए.आई.-शिखरसम्मेलनेन पञ्चत्रिंशत्-सहस्रात् अधिकानि पञ्जीकरण-पत्राणि प्राप्तानि । इलेक्ट्रानिक्स् एण्ड आई. टी. इति मन्त्रालयेन सूचितं यत् पञ्चदिवसीये कार्यक्रमे पञ्चदश-तः विंशति-यावत् सर्वकारीयाः प्रमुखाः, विविध-देशानां मन्त्रिणः, प्रमुख-वैश्विकानां भारतीयानाम् च उद्योगसंस्थानानां चत्वारिंशत्-तः अधिकाः सी. ई. ओ. इत्येते संस्थाप्रमुखाः , शतं संख्याकाः देशाः च भागं ग्रहीष्यन्ति ।

**जयशङ्करः अमेरिकायात्राः**

विदेशमन्त्री एस्-जयशङ्करः अद्य अमेरिका-देशस्य त्रिदिवसीयां यात्राम् अस्ति । सः राज्यसचिवेन मार्को रुबियो इत्यनेन समाहूते क्रिटिकल्-मिनरल्स्-मिनिस्टिरियल्- इति उपवेशने भागं ग्रहीष्यति ।

**लोकसभा-स्थगनम्**

लोकसभायाः कार्याचरणं राष्ट्रपतेः अभिभाषणस्य धन्यवादप्रस्तावस्य समये पूर्वसेना-प्रमुखस्य एम्. एम्. नरवणे इत्यस्य अप्रकाशित-पुस्तकस्य विषये विपक्षिदलस्य नेतृणा राहुलगान्धिना प्रदत्तं वक्तव्यं विरुध्य संसदि प्रवर्तमानेन कोलाहलेन त्रिवारं बाधितं जातम् । अपराह्णे चतुर्वा-वादने द्वितीय-स्थगनस्य अनन्तरं यदा सभा पुनरारभत् , तदा गान्धिमहोदयः पुनः अप्रकाशितं पुस्तकम् अधिकृत्य टिप्पणिम् अकरोत्, यां विरुध्य कोषपीठस्य सदस्याः आक्षेपं कृतवन्तः। पीठासीन-अधिकारी श्रीगान्धी-वर्यं अध्यक्षनिर्णयस्य स्मरणं कारयित्वा धन्यवादप्रस्तावस्य विषये प्रतिबद्धः भवितुम् आग्रहम् अकरोत्। संसदीयकार्यमन्त्री किरेन रिजिजुः अपि गान्धी-वर्यं केवलं धन्यवादप्रस्तावे एव वक्तुं प्रार्थयत्। अध्यक्षस्य पुनः पुनः आग्रहेणापि, गान्धिमहोदयः पुनः तत् विषयम् उल्लेखितवान्, यस्य कारणात् श्वः प्रातः एकादश-वादनं यावत् सभायाः स्थगनम् अभवत्। पूर्वं, यदा गान्धिमहोदयः तस्य पुस्तकस्य विषये उक्तवान्, तदा रक्षामंत्री राजनाथसिंहः गान्धी-महोदयस्य आरोपं प्रख्यापयत् यत् सः काल्पनिकांशान् उद्धृत्य सभां भ्रमयति , ये तथ्यात्मकरूपेण सत्याः न सन्ति । एतादृशानां वक्तव्यानां विषये असहमतिं प्रकटयन् संसदीय-कार्यमन्त्री किरेन-रिजिजुः अवदत् यत्, राहुलमहोदयः सेनायाः अपमानम् न कुर्यात् । कोलाहल-कारणेन लोकसभायाः कार्याचरणम् अपराह्णे चतुर्वादनं यावत् स्थगितम्

**क्रीडास्पर्धा**

एशियन्-राइफल-एण्ड-पिस्टल-शूटिंग-चैम्पियनशिप् इत्येषा क्रीडाप्रतियोगिता नवदिल्ल्यां समारब्धा ।

।। इति वार्ताः ।।